TRIVANDRUM SANSKRIT SERIES.
No. CXXXIII.
Śrī Citrodayamañjarī.
No. XXII.

THE

UDAYAVARMACARITA

EDITED BY

K. SĀMBAŚIVA ŚĀSTRĪ,
Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1938.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १३३.

श्रीचित्रोदयमञ्जरी ।

ग्रन्थाङ्कः २२.

उदयवर्मचरितम् ।

पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्षेण

के. साम्बशिवशास्त्रिणा

संशोधितम् ।

तच्च

अनन्तशयने

महोन्नतमहामहिमश्रीचित्रावतारमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः ११११ क्रैस्ताब्दाः १९३६.

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः ।
स्वातिज्योतिरिवादितः समुदितश्चित्रावतारः स्वयं
मार्ताण्डाग्रसरो विराजति महाराजः स रामाभिधः ॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
श्रीमद्वाञ्चिवसुन्धरानवयशोराशिप्रकाशात्मिका ।
उत्फुल्लत्सुकृतिप्रसाधनधृतामोदोन्नदाड्डिण्डिमा
श्रीचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम् ॥

के. साम्बशिवशास्त्री.

PREFACE.

Udayavarmacaritam, occurring in Kolarāṣṭravarṇana, an episode in Keraḷamāhātmya, the context being the consecration of several divinities and Brahmins in the land of Keraḷa, is dialogued as one between a Dvija and a Sūta, to pass for a legend. The King Udayavarman invited Brahmins from afar, bestowed on them rich presents to the chagrin of the indigenous Brahmins who turned hostile towards him, to absolve himself of the sin of the slaughter of Brahmins in battle and thus caused the land of Keraḷa to overflow with Brahmin community. The succeeding verses,

"कोळम्बाब्दे क्षमाखने'

(पृ. ७. श्लो. ६१.)

ततो बहुतिथे काले गते कोळम्बवत्सरे ।
वर्षोरसे कुम्भमासे सौरेऽह्नि सुरगायक! ॥"

(पृ. ८ श्लो. ७५.)

"कोळम्बाब्दे भातिरसे कुम्भमासे सुरेऽहनि ।
विद्यारण्ययतीन्द्रश्च षोडशग्रामिणो द्विजाः ॥"

(पृ १. श्लो ९.१.)

disclose the date of that event as the latter half of the 11th century thereby bringing the time of a certain Vidyāraṇyayati close to that period. The lines below:

'तदा त्रिग्रामिणो विप्राः प्राप्य माधवपण्डितम् ।'

(पृ. ५. श्लो. ४१.)

"तद् दृष्ट्वा महदाश्चर्यं स्तुत्वा माधवपण्डितम् ।
माधवाचार्य इत्यासीद् व्योम्नि वागशरीरिणी ॥"

(पृ. ५. श्लो. ६१.)

betoken that Vidyāraṇya must have been a different appellation of Mādhavācārya. Be that as it may, a doubt may crop up as to whether he was the same Mādhavācārya of the 14th century A. D., to whom Sarvadarśanasaṅgraha, Dhātuvṛtti and Ṛgbhāṣya owe their origin, or another individual of that denomination who must have flourished earlier than the former. Mahākavi Rao Sahib Uḷḷūr S. Parameśvara Aiyar holds the view that another Udayavarmacarita, a Sanskrit composition consisting of 11 chapters originated from the pen of one Ravi Varmā, the celebrated King of Kola Kingdom in the 8th century 'वृद्धिदाम्बा' in the text determines the date of Udayavarmā as the latter

half of the 8th century. Again the term 'गुरो भूली' lends support to the belief that this land was blessed by the universal preceptor — the great Saṅkarācārya of world-wide repute. But others do not see any connection between Vidyāraṇyayatīndra *alias* Mādhavapaṇḍita who showered his choicest blessings on Udayavarmā and hence the conjecture, in consonance with the chronogram *Vacoratna* suggestive of the Malabar Era, that Udaya Varmā of the latter half of 11th century, the hero of this production, could never be contemporaneous with Mādhavācārya, otherwise known as Vidyāraṇya of the 14th century. Thus both the views are illogical. The eminent research workers on ancient history have made startling discoveries towards this end. Some shreds of evidence are plausible in this work to fix the date of one Mādhavācārya, in or about the 8th century A. D. A discussion has been attempted in the following verse :

"स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।
चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ॥"

One Mādhavapaṇḍita, son of Nārāyaṇa, the commentator on Sāmaveda is proved to have been devoutly attached to the King Udayavarmā, from the facts that Nārāyaṇa, the contemporary of Skandasvāmin was his father and that he was a compatriot of Harihārasvāmin of the 8th century, a disciple of Skandasvāmin and a commentator on Śatapatha Brāhmaṇa. However, this theory is acceptable till it is refuted by contrary evidence. Somehow he must have won the title of Vidyāraṇya since one's period of existence is not a criterion for one's celebrity. Notwithstanding these contradictions, an ancient historical treatise of this stamp should never pass unnoticed.

A clear evidence furnished by the following lines:

"वल्लभेशार्चनाद् ग्राम-
त्यागाच्चैते हि देशिनः ।"

(पृ. १२. श्लो. १२४.)

may be advanced from the text to show that Brahmins styling themselves Embrāntiris made this place their permanent habitation. Several eminent poets basing their arguments on similar facts adduced from this work ascribe its authorship to a Brahmin of Tiruvalladeśa as is evident from the following stanza :

"श्रीमत्कोलक्षितीशोदयनृपचरितं देशिकानीतिरूपं
तद्वंश्येनात्र केनाप्यभिहितमतिविस्तीर्णमध्याययुग्मम् ।"

Again the closing Khaṇḍa and the introductory verse:

"श्रीराघवं प्रणम्याहं कुशाग्र:क्षेत्रवासिनम् ।
कोलभूपोदयोदन्तं ब्राह्मणस्थापनं ब्रुवे ॥"

(पृ. १. श्लो. १.)

bear out that he was a poet belonging to कुशाग्रक्षेत्र (Cerutaḷattu). The Mahākavi also subscribes to this view. Some believe that he might be another Brahmin hailing from Tiruvalla. References to many places and individuals are noticed in the course of the work.

The unique original manuscript used for this publication belongs to the revered Kēśava Valiattān, a native of Tiruvalla in Travancore, to whom I extend my heartfelt thanks. I have great pleasure in presenting this work to the enlightened public.

Trivandrum,
4-2 1113.

K. SĀMBAŚIVA ŚĀSTRĪ.

॥ श्रीः ॥

निवेदना ।

इदम् उदयवर्मचरितं किमप्यन्यतममङ्गं श्रीकेरलमाहात्म्यस्य, यत् कोलराष्ट्रवर्णने प्रकृतं देवब्रह्मप्रतिष्ठाधिष्ठितं पुराणच्छायामापादयितुं द्विजसूत-संवादमर्यादया संगुम्फितम् । अयमत्र चरितसंग्रहः परिसमाप्तौ दशश्लोक्या सूचितः । युद्धे ब्रह्महत्यया ग्रस्तस्य उदयवर्मणो राज्ञस्तत्परिहाराय विदेशाद् ब्राह्मणानानाय्य स्वदेशाचारेण तानभ्युपगत्य स्वदेशीयब्राह्मणैरनभ्युपेतस्य तत्तद्दानस्य प्रतिग्राहणं, ततो मुक्तस्य शुद्धस्य च चिरायुषावस्थानं, कालेन प्रवहता तेषां विदेशीयानां ब्राह्मणानामिह केरलक्षेत्रेषु पूजकतया प्रतिष्ठापनं चेत्यसौ तैर्यांपि सङ्ग्रहस्य कोऽपि सङ्ग्रहः समर्प्यते ।

'कोळम्बाब्दे क्षमाखने'

(पृ० ७. श्लो० ६९.)

"ततो बहुतिथे काले गते कोळम्बवत्सरे ।
वचोरत्ने कुम्भमासे सौरेऽह्नि सुरगायक ! ॥"

(पृ० ८. श्लो० ७५.)

कोळम्बाब्दे भातिरत्ने कुम्भमासे सुरेऽहनि ।
विद्यारण्ययतीन्द्रश्च षोडशग्रामिणो द्विजाः ॥

(पृ० ९. श्लो० ९१.)

इत्यादिभिः सम्भवोऽयं क्रिस्त्वब्दीयैकादशशतकस्योत्तरार्धे सम्पन्न इत्यूह्यं भवति । कश्चन विद्यारण्ययतीन्द्रश्च तदात्वे प्रतिपत्तव्यो भवति ।

"तदा त्रिग्रामिणो विप्राः
प्राप्य माधवपण्डितम् ।"

(पृ० ५. श्लो० ४३.)

'तद् दृष्ट्वा महदाश्चर्यं स्तुत्वा माधवपण्डितम् ।
माधवाचार्य इत्यासीद् व्योम्नि वागशरीरिणी ॥

(पृ० ५. श्लो० ४९)

इत्यादिभिः स च विद्यारण्यो माधवाचार्यपरपर्यायः सम्पद्यते । सत्येवं सोऽयं माधवाचार्यः सर्वदर्शनसङ्ग्रहधातुवृत्तिऋग्भाष्यादिबहुनिबन्धकर्ता श्रीसायणमाधवाचार्यो वान्यो वेति शङ्कायां क्रिस्त्वब्दीयचतुर्दशशतकजीविनः सायणमाधवाचार्यादन्य एव सम्भाव्यः, कल्प्यो वा कश्चिदन्योऽपि विद्यारण्यनामा माधवपाण्डितस्ततः प्राक् । अत्र विषये महाकवि-रावुसाहिब् श्रीपरमेश्वरार्या एवं मन्यन्ते — अस्ति किमपि संस्कृतकाव्यम् उदयवर्मचरिताभिधमेकादशाध्यायीसम्मितं केनापि रविवर्मनाम्ना कोलभूपतिना क्रिस्त्वब्दीयाष्टमशतकोत्तरार्धजीविना विरचितम् । 'वृद्धिदाम्बे'ति कलिवत्सरानुगुण्येन उदयवर्मणो जीवितविजयः क्रिस्त्वब्दीयाष्टमशतकोत्तरार्धं भवति । 'तुङ्गो धूली'ति कलिसङ्ख्यामर्यादया तदात्वे श्रीमत्परमहंसपरिव्राजकजगद्गुरुश्रीशङ्करभगवत्पादाचार्येण तदनुग्रहश्च सुतरां सम्भाव्यते । परन्तु विद्यारण्ययतीन्द्रः कोऽपि माधवपण्डित इहोदयवर्मानुग्राहकः प्रतिपाद्यमानो न घटते । अतो 'वचोरत्न' इत्यादिकोळम्बवत्सरक्रमेण प्रस्तुतकृतिनायक उदयवर्मा क्रिस्त्वब्दीयैकादशशतकोत्तरार्धजीवी क्रिस्त्वब्दीयचतुर्दशशतकवर्तिना माधवाचार्येण विद्यारण्येन कथङ्कारं घटताम् । तस्मादुभयमिदमसङ्गतमित्यादि । मन्ये प्राक्तनचरित्रविज्ञानदृशा सम्यगुपकृतं महाभागैः । परन्तु क्रिस्त्वब्दीयाष्टमशतके कस्यचन माधवपण्डितस्य लगन्ती काचिदुपपत्तिस्तदंशे ग्रन्थमिमं प्रमाणं कर्तुमलमिति तत्रेदं विचार्यते —

> "स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।
> चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ॥"

इति सहजीविषु भाष्यकर्तृषु अन्यतमस्य नारायणस्य सूनुः कोऽपि माधवपण्डितः सामवेदभाष्यकारः स्कन्दस्वामिसहचरनारायणपुत्रतया शतपथब्राह्मणभाष्यकर्तुर्हरिस्वामिनः स्कन्दस्वामिशिष्यस्य क्रिस्त्वब्दीयाष्टमशतकजीविनः सहचरतया च महानुभावः काममस्य उदयवर्मणः प्रसादानुग्रहकारी सम्पद्यमानो न विना प्रमाणान्तरोपमर्दं निषेधमर्हति । विद्यारण्यख्यातिश्च सम्भवदार्हन्तीप्रयुक्ता न समयविशेषजीवितामन्वयव्यतिरेकाभ्यामपेक्षते इति ।

सर्वथा प्रतियोगिमर्यादयापि प्राचीनचरितगुम्फनमेतादृशमविरलप्रशंसामर्हति ।

"वल्लभेशार्चनाद् ग्रामत्यागाच्चैते हि देशिनः ।"

(पृ० १२. श्लो० १२४.)

इत्यादिभिः तिरुवल्लादेशिनः एम्प्रान्तिरिसंज्ञिता ब्राह्मणा इह प्रतिष्ठापिता इत्यादिभागेषु नैकेषु महाकविसम्मतिरेतद्ग्रन्थप्रामाण्यमुपोद्बलयन्ती सुतरामनुग्राहिका विजयते । अस्य च खण्डकाव्यस्य कर्ता कश्चित् तिरुवल्लादेशीयो द्विजः —

श्रीमत्कोलक्षितीशोदयनृपचरितं देशिकानीतिरूपं

तद्वंश्येनात्र केनाप्यभिहितमतिविस्तीर्णमध्याययुग्मम् ।

(पृ० १६. श्लो० १०.)

इति संग्रहोपान्त्यपद्यखण्डेन,

"श्रीराघवं प्रणम्याहं कुशाधःक्षेत्रवासिनम् ।

कोलभूपोदयोदन्तं ब्राह्मणस्थापनं ब्रुवे ॥"

(पृ० १. श्लो० १.)

इति प्रतिज्ञापद्येन च कुशाधःक्षेत्र (ദർഭക്കുളം) देशवासी कोऽपि कविरिति ज्ञायते । अत्र च महाकवीनामुद्देशोऽनुकूलः । विशिष्य तं तं कविं कमप्यन्यतमं कुशाधःक्षेत्रवासिनं द्विजं च तिरुवल्लादेशीयं मन्यन्ते । अत्र च बहवो देशाः देशिनश्च नामग्राहं गृहीताः ।

अस्य चैतादृशस्य प्रसिद्धीकरणस्याधारभूत आदर्शोऽद्वितीयः श्रीवञ्चिराज्यान्तर्गततिरुवल्लाप्रदेशवास्तव्यमहामहिमश्रीकेशववलयत्तान्ग्रन्थालयादधिगत इति तेषु बहुमानमसमानमाकलयन् कृतज्ञतामनुस्मरंश्चरितमिदं महाजनसमक्षमवतारयामि कृतकृत्यः ॥

अनन्तशयनम्,
४-२-११३.

के. साम्बशिवशास्त्री.

॥ श्रीः ॥

उदयवर्मचरितम् ।

श्रीराघवं प्रणम्याहं कुशाद्यक्षेत्रवासिनम् ।
कोलभूपोदयोदन्तं ब्राह्मणस्थापनं ब्रुवे ॥ १ ॥

साधु निर्मत्सराः सन्तु शोधयन्तु वचो हि नः ।
दूषयन्तु हसन्त्वन्ये सासूयान् नाद्रियामहे ॥ २ ॥

ऋषभाद्रौ महाक्षेत्रे स्वाधीनं सूतमागतम् ।
सत्कथां श्रोतुमिच्छन्तः पर्यपृच्छन्त तं द्विजाः ॥ ३ ॥

द्विजा ऊचुः—

साधु सूत ! महाभाग! सर्वज्ञोऽ(स्मि ? सि) महामते! ।
सत्कथां श्रोतुमिच्छामो वद नो वदतां वर! ॥ ४ ॥

सूत उवाच—

साधु पृष्टं द्विजश्रेष्ठाः! सत्कथां श्रोतुमिच्छुभिः ।
देवब्रह्मप्रतिष्ठां वो वक्ष्ये शृणुत सादरम् ॥ ५ ॥

गन्धर्वाय पुरा ऽक्तं सुप्रभाय सुरर्षिणा ।
तदहं साम्प्रतं वक्ष्ये पुण्यं सच्चरितं द्विजाः! ॥ ६ ॥

कदाचित् केरलीं सर्वां व्योमयानेन पर्यटन् ।
यदृच्छया कोलराष्ट्रं प्राप्तस्तत्र नवान् द्विजान् ॥ ७ ॥

सुप्रभो नाम गन्धर्वः समालोक्य महामुनिम् ।
गत्वा संशयमापन्नो नारदं पर्यपृच्छत ॥ ८ ॥

G. P. T. 840. 500. 16-4-1112. B

सुप्रभः—

क इमे ब्राह्मणश्रेष्ठा नात्र पूर्वं विलोकिताः ।
केन नीताः कोलराज्यं कस्माद् देशात् कुतो मुने! ॥ ९ ॥

सुप्रभेणैवमादिष्टो नारदः स महामुनिः ।
तत्कथामादितो वक्तुमारेभे तं मुदा हसन् ॥ १० ॥

नारद उवाच—

चेरपादमहाराजः पूर्वं शास्त्रपरीक्षणे ।
बौद्धशास्त्रेऽतिविश्वस्तो मक्कं गन्तुमियेष सः ॥ ११ ॥

गमिष्यन् चेरपादोऽयं विभज्यादात् स केरलम् ।
स्वस्रीयेभ्यश्च पुत्रेभ्यः प्रभुभ्योऽपि दशाष्टधा ॥ १२ ॥

माटेशः कोटिलिङ्गेशः पर्पेशः पुरलीपतिः ।
निम्बेशश्चेति पञ्चासन् स्वस्रीयास्तस्य भूपतेः ॥ १३ ॥

कोलेशः कूपकेशश्च पोरलेशेरलेश्वरौ ।
महोदयः कुरुम्बेशो वेणशोऽप्यब्धि(व ? पः) सुताः ॥ १४ ॥

प्रभवः पञ्च शूद्राश्चेत्यासन्नष्टादशाधिपाः ।
सर्वेषामेव कोलेशः करग्राह्यभवद् बली ॥ १५ ॥

एवं चिरगते काले कोलभूपस्य सुप्रभ! ।
शत्रुभिः कलहस्त्वासीद् दुर्बलस्य महाबलैः ॥ १६ ॥

तस्मिन् युद्धे ब्रह्महत्यापापस्तस्य ह्यजायत ।
शत्रुभिर्युध्यमानस्य कोलेन्द्रस्य विधेर्बलात् ॥ १७ ॥

निवृत्ते समरे तत्र ब्रह्महत्याघशान्तये ।
देवब्रह्मप्रतिष्ठार्थदाने चित्तमकल्पयत् ॥ १८ ॥

ब्रह्महत्यानिवृत्त्यर्थं क्षेत्रदानादि कल्पितम् ।
लक्ष्मीग्रामादिविप्रेन्द्रा नागृह्णन् पापभीरवः ॥ १९ ॥
ततो विषण्णः कोलेशो ब्रह्महत्यार्तधीश्चिरम् ।
उवासोदयवर्मासौ विप्रानन्विष्य सुप्रभ ! ॥ २० ॥
श्रीवल्लीग्रामिणो विप्रा गण्डक्या उद्धृतं तदा ।
प्राप्ताः श्रीवल्लभे बिम्बं दिव्यं स्थापयितुं हरेः ॥ २१ ॥
गोकर्णनद्यां तन्मग्नं मध्येमार्गं विधेर्बलात् ।
नोद्धर्तुं तेऽशकन् साह्यं कर्णाटास्तावदर्थिताः ॥ २२ ॥
कर्णाटास्तौलवाश्चैते बिम्बमुद्धृत्य तं क्षणात् ।
श्रीवल्लभे स्थापयित्वा समं सम्पूज्य च स्थिताः ॥ २३ ॥
पाञ्चरात्रं च का(वा ? पा)लं विधिमादृश्य नित्यशः ।
गन्धर्व ! वल्लभेशं तं पूजयन्ति स्म चोभये ॥ २४ ॥
इडुकुञ्चिविलक्कूरगुणवत्याख्यग्रामिणः ।
श्रीवल्लीग्रामिणश्चैव पूजकाश्चोभये हरेः ॥ २५ ॥
दूतैरानाय्य तान् विप्रान् ब्रह्महत्यैनसा समम् ।
ददौ क्षेत्रद्वयं राजा तेभ्योऽसौ बहुदक्षिणम् ॥ २६ ॥
कृशाधक्षेत्रमत्रैकमर्हस्थं नाम चेतरत् ।
तेभ्योऽदाद् बहुदेवस्वं प्रामाण्यं चोदयो नृपः ॥ २७ ॥
नररत्नसमायां प्राक् कोलम्बे सागरान् द्विजान् ।
आनाय्य तेभ्यो ददिवान् क्षेत्राण्युदयभूपतिः ॥ २८ ॥
पाञ्चरात्राद्यागमोक्तविधिना पूजनाद्धरेः ।
ग्रहणाद् ब्रह्महत्यादेर्ब्राह्मणैस्ते बहिष्कृताः ॥ २९ ॥

बहिष्काराद् द्विजेन्द्राणां कर्णाटा दीनमानसाः ।
ब्रह्महत्याभिभूताश्च कोलराज्ये चिरं स्थिताः ॥ ३० ॥
नित्यानन्दमहायोगी बदर्याश्रमतस्तदा ।
शिष्यैश्चतुर्भिः सहितः कुशाधक्षेत्रमाययौ ॥ ३१ ॥
क्षेत्रान्तरे स्थितो योगी देवकार्याणि सोऽकरोत् ।
तदा निष्कासितो दुष्टैर्बहिः शिष्यैः स चाशपत् ॥ ३२ ॥
यूयं सर्वेऽपि दुर्वृत्ता देवब्राह्मणवैरिणः ।
दुर्ब्राह्मणाः कलहिनो मिथः सन्तु बहिष्कृताः ॥ ३३ ॥
एवं शप्त्वा गते तस्मिन् वृद्धाः केचन तद्विदः ।
तं नत्वा समनुज्ञाप्य शापमोक्षं ययाचिरे ॥ ३४ ॥
तेभ्यस्तुष्टः स योगीन्द्रः शापमोक्षं ददौ तदा ।
वर्षादर्वाग् दिव्ययोगी कश्चिदत्रागमिष्यति ॥ ३५ ॥
तं प्रणम्य प्रसाद्यैतद् यूयं प्रार्थयत द्विजाः! ।
मोक्षयिष्यति वः शापात् सह संयोज्य स द्विजान् ॥ ३६ ॥
इत्येषां शापमोक्षं च दत्त्वा शिष्यैः स निर्ययौ ।
दृष्ट्वा माधवभट्टस्तं सशिष्यं गृहमानयत् ॥ ३७ ॥
विधिवत् सत्कृतात् तस्मात् प्रसन्नात् स तु माधवः ।
दिव्यं स भगवद्ध्यानं मन्त्रतन्त्रादि चाग्रहीत् ॥ ३८ ॥
गतेऽस्मिन्नुत्तरामाशां तदुक्तविधिना ततः ।
भक्त्या गुणवतीनाथं सिषेवे परमेश्वरम् ॥ ३९ ॥
प्रीते गुणवतीनाथे सर्वज्ञे परमेश्वरे ।
अष्टैश्वर्यं च तस्यासीद् विद्याश्चाष्टादश स्वयम् ॥ ४० ॥

ततो वाक्कूरकक्षेत्रसभायोगं स(सा ? मा)गतः ।
मानितस्तत्र विद्वद्भिरासीन्माधवपण्डितः ॥ ४१ ॥
भूताग्रवाह्यां शिबिकामारुह्यामलकस्थलीम् ।
सङ्गच्छन् पितृपिण्डार्थी स चोदयपुरं ययौ ॥ ४२ ॥
तदा त्रिग्रामिणो विप्राः प्राप्य माधवपण्डितम् ।
न्यवेदयन् स्ववृत्तान्तं शापदानुग्रहादिकम् ॥ ४३ ॥
क्षेत्रदानं च भूयोऽपि ब्रह्महत्याप्रतिग्रहम् ।
आदातुं भूपनिर्बन्धं त्रिशिष्यावेदयन्त ते ॥ ४४ ॥
यूयं तु ब्रह्महत्यायाः क्षेत्रस्यापि प्रतिग्रहम् ।
न गृह्णीत पुनर्विप्रा यावदागमनं मम ॥ ४५ ॥
श्रीधात्रीक्षेत्रतो गत्वा पित्र्यपिण्डार्पणात् परम् ।
मोक्षयिष्यामि वः शापाद् मा खिद्यत महीसुराः ! ॥ ४६ ॥
इत्युक्त्वामलकक्षेत्रं प्राप्य पिण्डशिलान्तरे ।
दृष्ट्वा श्वानं मृतं योगाज्जीवयन् पिण्डमप्यदात् ॥ ४७ ॥
प्राधान्यमप्यमूल्यत्वं कर्णाटानामकल्पयत् ।
तदादि तत्र हैकानां पिण्डे तदधिकारिणः ॥ ४८ ॥
तद् दृष्ट्वा महदाश्चर्यं स्तुत्वा माधवपण्डितम् ।
माधवाचार्य इत्यासीद् व्योम्नि वागशरीरिणी ॥ ४९ ॥
ततोऽस्मिन् माधवाचार्ये गते श्रीशम्बरालयम् ।
शिबिकाग्रवहौ भूतौ त्यक्त्वा तं जग्मतुर्द्रुतम् ॥ ५० ॥
पतिते शिबिकाग्रे तत्कारणं विमृशन्नसौ ।
चक्षुषा तत्र दिव्येन व्यजानात् तद्विचेष्टितम् ॥ ५१ ॥

तत्रत्यस्वकुलोद्भूतदुष्प्रतिग्रहणादिकम् ।
पुनश्च ब्रह्महत्यायाः क्षेत्रस्यापि प्रतिग्रहम् ॥ ५२ ॥
स्वकुलीनकृतं पापं स्वात्मन्यपि विबाधितम् ।
बुद्ध्वा तान् माधवाचार्यः शशापानाश्रवान् कुधा ॥५३॥
न राज्ञः प्रतिगृह्णीयादिति स्मृतिवचो विदन् ।
यो दुष्प्रतिग्रही मूढः स सद्यः पतति ध्रुवम् ॥ ५४ ॥
दुर्वृत्ताः सागराः सर्वे लोकोपद्रवकारिणः ।
अनुष्ठानवतां नित्यमन्तराया भवन्ति ते ॥ ५५ ॥
एतत् सर्वं समालोच्य सगरः सर्ववित् प्रभुः ।
दैवेन नाशिता दुष्टा इत्युवाचातिहर्षितः ॥ ५६ ॥
माता वा जनको वापि भ्राता वा तनयोऽपि वा ।
अधर्मं कुरुते यस्तु स एव परिशुष्यते ॥ ५७ ।
यस्त्वधर्मेषु निरतः सर्वधर्मविरोधकृत् ।
तं रिपुं परमं विद्याच्छास्त्राणामेष निश्चयः ॥ ५८ ॥
सगरः पुत्रनाशेऽपि न कदाचिच्छुशोच सः ।
दुर्वृत्तशमनं यस्मात् सतामुत्साहकारणम् ॥ ५९ ॥
इति शप्त्वा महायोगी तत्र श्रीशम्बरालयात् ।
क्रुद्धः श्रीमाधवाचार्यः कुशाधक्षेत्रमाययौ ॥ ६० ॥
तावत् स कोलभूपोऽपि तत्रत्या ब्राह्मणाश्च ते ।
अनुगम्य महात्मानं माधवार्यं ववन्दिरे ॥ ६१ ॥
बहुधा तमनुज्ञाप्य परिक्रम्य प्रणम्य च ।
दौर्ब्राह्मण्यं शापमोक्षं चासकृत् ते ययाचिरे ॥ ६२ ॥

हे राजन्! कोलभूपाल! साधुब्राह्मणवञ्चनात्।
दुर्दानात् ते नातिचिराद् राज्यभ्रंशो भविष्यति ॥ ६३ ॥
योगीश्वरापमानाच्च तदनुष्ठानरोधतः।
ब्रह्महत्यादिपापानां दुर्दानानां प्रतिग्रहात् ॥ ६४ ॥
दुर्ब्राह्मणा भविष्यन्ति भवन्तः सर्वनिन्दिताः।
इत्युक्त्वा तान् द्विजान् योगी निर्गन्तुमुपचक्रमे ॥ ६५ ॥
तदानुगम्य राजा च विप्राश्च बहुशोऽपि ते।
शापमोक्षमयाचन्त खिन्नाः सन्तोष्य सुप्रभ! ॥ ६६ ॥
गोकर्णे सत्सभायोगे समागच्छत हे द्विजाः!।
तावत् त्वच्छापमोक्षादि समालोच्य करोम्यहम् ॥ ६७ ॥
इत्युक्त्वा तान् समाश्वास्य राजानं च स सुप्रभ!।
गोकर्णं प्राप्य संन्यासी विद्यारण्यमुनिर्बभौ ॥ ६८ ॥
ततश्चिरगते काले कोलम्बाब्दे क्षमाखने।
वाक्कूराख्ये महाक्षेत्रे सत्सभा मिलिताभवत् ॥ ६९ ॥
चतुष्षष्टितमग्रामब्राह्मणानां च योगिनाम्।
राज्ञामपि महायोगः संबभूव महात्मनाम् ॥ ७० ॥
विद्यारण्ययतीन्द्रस्तु संसद्यग्रासनस्थितः।
तत्र तावन्नृपो विप्राः शापमोक्षं जिघृक्षवः ॥ ७१ ॥
महाजनैः सम्मिलितां सभां सम्प्राप्य सादरम्।
पूर्ववत् प्रणिपत्यैतान् शापमोक्षं ययाचिरे ॥ ७२ ॥
श्रुत्वा तद्वचनं + + समालोच्य सभासदः।
गोकर्णाख्ये महाक्षेत्रे सभायां प्राप्तुमादिशन् ॥ ७३ ॥

सभायां निर्गतायां तु कोलभूपश्च ते द्विजाः ।
खिन्नाः सुप्रभ! सर्वेऽपि प्रतिजग्मुर्यथागतम् ॥ ७४ ॥
ततो बहुतिथे काले गते कोलम्बवत्सरे ।
वचोरत्ने कुम्भमासे सौरेऽह्नि सुरगायक!॥ ७५ ॥
गोकर्णाख्ये महाक्षेत्रे सङ्गतासीन्महासभा ।
तत्र पूर्वोक्तवद् राजा विप्रास्ते च समाययुः॥ ७६ ॥
चतुष्षष्टितमग्रामब्राह्मणाश्च यतीश्वराः ।
राजानश्च महात्मानस्तत्राभूवन् सभासदः ॥ ७७ ॥
महासभान्तरं प्राप्य प्रणिपत्य सभासदः ।
शापमोक्षाययाचन्त पुनःपुनरपि द्विजाः ॥ ७८ ॥
राज्ञश्च शापदुष्टानां विप्राणां च निवेदनम् ।
श्रुत्वा सभासदः सर्वे समालोच्यैवमब्रुवन् ॥ ७९ ॥
ख्यापनेनानुतापेन प्रशस्ताध्ययनेन च ।
पापकृन्मुच्यते पापात् तथा दानेन चापदि ॥ ८० ॥
इति स्मृतिवचो विप्रान् श्रावयित्वा यथाविधि ।
परिषत्ख्यापनं सानुतापं चित्तमकारयन् ॥ ८१ ॥
चतुर्वेद(ः?)स्वाध्ययनं सभ्या(सै साध्य ? स्तैः साध्व)कार-
[यन् ।
दानानि शास्त्रदृष्टानि पापनिर्मोचनानि च ॥ ८२ ॥
इत्थं निकृतिनिर्दोषैर्ब्राह्मणैस्तैरयोजयन् ।
शुद्धान् विप्रोत्तमानन्यान् सकुटुम्बान् सभासदः ॥ ८३ ॥
सप्तत्रिंशाधिकशतद्वयसङ्ख्यैश्च सागरैः ।
चत्वारिंशाधिकशतद्वयसङ्ख्यान् द्विजान् वरान् ॥ ८४ ॥

संयोज्य नवरत्नाख्यान् सकुटुम्बान् सभासदः ।
कृतार्थयित्वा राजानं विप्रांश्चाप्रीणयन्नमून् ॥ ८५ ॥
सप्तसप्तत्यधिकया चतुःशत्या द्विजोत्तमैः ।
पूर्वस्माच्छुभे राजा कोलेशः सत्सभाख्यया ॥ ८६ ॥
विशेषविद्भिस्तत्त्वज्ञैः सर्वमालोच्य तत्त्वतः ।
सागरे नवरत्नं च योजनीया च सत्सभा ॥ ८७ ॥
त्रिग्रामिणः सागरास्ते चतुर्दशगृहा द्विजाः ।
त्रयोदशग्रामिणोऽन्ये नवरत्ना दशौकसः ॥ ८८ ॥
यजुर्वेदविदः सर्वे बौधायनिकसूत्रिणः ।
षोडशग्रामिणोऽप्येते कर्णाटा हैकका मताः ॥ ८९ ॥
महाबलस्य गोकर्णमहाक्षेत्राधिवासिनः ।
सन्निधौ सत्यमकरोत् सत्सभेयं सभान्तरे ॥ ९० ॥
कोलम्बाब्दे भातिरत्ने कुम्भमासे सुरेऽहनि ।
विद्यारण्ययतीन्द्रश्च षोडशग्रामिणो द्विजाः ॥ ९१ ॥
कोलभूपोऽन्यभूपाश्च नानादेशमहाजनाः ।
गोकर्णाख्ये महाक्षेत्रे तत्र सम्मिलिता सभा ॥ ९२ ॥
सर्वे वयममी नित्यं श्रौतस्मार्तादिकर्मसु ।
विवाहोपनयाद्येषु भवाम सहकारिणः ॥ ९३ ॥
परस्परं हि कुर्वाणा विवाहाद्यात्तबान्धवाः ।
निर्मत्सरा भविष्यामः श्राद्धे पित्र्यादिकर्मणि ॥ ९४ ॥
पूर्ववत् प्रतिवत्स्यामो दौर्ब्राह्मण्यादिपातकम् ।
वयमुल्लङ्घयिष्यामो यावत्सत्यमिदं कृतम् ॥ ९५ ॥

सतां समक्षं सर्वेषां महाबलपुरःस्थिताः ।
घण्टां स्पृशन्तः प्रत्येकं सत्यं ते सागरा व्यधुः ॥ ९६ ॥
देवदुन्दुभयो नेदुरासीद् वागशरीरिणी ।
कोलेशं प्रति विप्रांश्च सर्वेषां तत्र शृण्वताम् ॥ ९७ ॥
साधूदयमहाराज ! साधु हे ब्राह्मणाश्चिरम् ।
समं तिष्ठत नोचेद् वः पूर्वपापं भवेदिति ॥ ९८ ॥
तावत् प्रमुदिताः सन्तः सत्सभा स च पार्थिवः ।
विस्मिताश्च प्रशंसन्तो जग्मुः सर्वे यथागतम् ॥ ९९ ॥
स राजोदयवर्माथ महाबलपुरो बहु ।
उपहृत्य धनं भक्त्या तुष्टावेत्थं तमीश्वरम् ॥ १०० ॥
नमस्ते पार्वतीनाथ! नमस्ते करुणानिधे ! ।
नमस्ते त्रिजगन्नाथ! नमस्ते परमेश्वर! ॥ १०१ ॥
नमस्तुभ्यं भगवते ब्रह्मणे परमात्मने ।
सच्चिदानन्दरूपाय प्रत्यग्रूपाय ते नमः ॥ १०२ ॥
नमस्ते त्रिदशेशाय नमस्ते विश्वयोनये ।
ब्रह्मादिस्तम्बपर्यन्तजगज्जीवात्मने नमः ॥ १०३ ॥
ओङ्कारार्थाय ते विश्वतैजसे प्राज्ञरूपिणे ।
ब्रह्मविष्ण्वीशरूपाय बिन्दुनादात्मने नमः ॥ १०४ ॥
विश्वात्मने विश्वसृजे विराड्रूपाय साक्षिणे ।
प्रणवाद्याक्षरार्थाय तेऽकाराय नमो नमः ॥ १०५ ॥
विष्णवे सूत्ररूपाय साक्षिणे तैजसात्मने ।
ते द्वितीयाक्षरार्थाय ह्युकाराय नमो नमः ॥ १०६ ॥

रुद्राय प्राज्ञरूपाय साक्षिणे तेऽन्तरात्मने।
तृतीयाक्षरवाच्याय मकाराय नमो नमः॥ १०७॥

सार्धमन्तिकया शक्त्या सर्गस्थित्यन्तकारिणे।
नमस्तै बिन्दुरूपिण्या शिवायाखण्डमूर्तये॥ १०८॥

निर्मायो निर्गुणो नित्यो निष्कलो यो निरञ्जनः।
तुरीयाय परस्मै ते तस्मै नादात्मने नमः॥ १०९॥

सत्यं ज्ञानमनन्तं यद् गुहायां निहितं परम्।
सर्वज्ञं देवमीशानं प्रपद्येऽहं सदाशिवम्॥ ११०॥

सपुत्रं सगणं साम्बं त्वां शिवं परमेश्वरम्।
सर्वात्मनापि शरणं प्रपद्येऽहं कपर्दिनम्॥ १११॥

दीनबन्धो! दयासिन्धो! देव! शम्भो! नमोऽस्तु ते।
जानताजानताप्यागः क्षमस्वात्र मया कृतम्॥ ११२॥

इति स्तुत्वा प्रसाद्येशमुदयोऽथ महाबलम्।
उपहृत्य यतेश्चार्थं सर्वानप्रीणयज्जनान्॥ ११३॥

सागरैर्नवरत्नैश्च तया सत्सभया समम्।
ययौ सर्वाननुज्ञाप्य कोलराज्यं मुदा नृपः॥ ११४॥

उदयः प्राप्य राष्ट्रं स्वं हृष्टपौरं स्ववार्तया।
भ्रातरं रविवर्माणं मन्त्रिणोऽष्टाप्यतोषयत्॥ ११५॥

चतुरो नवरत्नानां सागराणां तु पञ्च च।
देशान् गृहादिक्षेत्रादीन् ब्रह्मस्वं च ददौ नृपः॥ ११६॥

नीलेश्वराद् दक्षिणतो बालशैलात् तथोत्तरं।
लक्ष्मीग्रामात् पश्चिमतः पय्यन्नूराच्च पूर्वतः॥ ७॥

तद्देशनवकस्येयं सीमा विप्राः सुरोपमाः ।
सम्पद्भिः स्वर्गतुल्यासीत् कोलभूः शृणु सुप्रभ! ॥ ११८ ॥
भाषावेषादिकं सर्वमाचारं चोदयो नृपः ।
लक्ष्मीग्रामद्विजश्रेष्ठैस्तुल्यं तेषामकल्पयत् ॥ ११९ ॥
स्मार्तांश्च वैदिकांश्चैषां स्वानीतानां द्विजन्मनाम् ।
कल्पयामास भूपोऽयं लक्ष्मीग्रामद्विजोत्तमान् ॥ १२० ॥
यज्ञं हैरण्यगर्भं च महादानानि धर्मवित् ।
यथाविधि वितन्वानो बहुधर्मसमार्जनात् ॥ १२१ ॥
लक्ष्मीग्रामद्विजश्रेष्ठैः स्वानीतैस्तैर्द्विजैरपि ।
भुक्त्वा भोगांश्चिरं राजा चोदयोऽपि दिवं ययौ ॥ १२२ ॥
ततः कोलद्विजास्त्वेते स्वर्गते चोदये नृपे ।
सर्वतः केरले व्याप्ता उपजीवन्ति देवलाः ॥ १२३ ॥
वल्लभेशार्चनाद् ग्रामत्यागाच्चैते हि देशिनः ।
स्वग्रामेषु न गृह्यन्ते शिष्टग्रामद्विजोत्तमैः ॥ १२४ ॥
कोलभूपोदयकृतं विप्रस्थापनमुत्तमम् ।
मयोक्तं सुप्रभाशेषं यत् पृष्टोऽहमिह त्वया ॥ १२५ ॥
इत्युक्त्वा नारदोऽगच्छत् सत्यलोकं महामुनिः ।
सुप्रभो विस्मितः सोऽपि ययौ चित्ररथालयम् ॥ १२६ ॥
एवं सूतवचः श्रुत्वा विप्रा वेदपरायणाः ।
विस्मितास्तं प्रशंसन्तो जग्मुस्तेऽपि यथागतम् ॥ १२७ ॥

इति श्रीकेरलमाहात्म्ये कोलराष्ट्रवर्णने
उदयवर्मचरिते ब्रह्मप्रतिष्ठा नाम
प्रकरणं सम्पूर्णम् ॥

पूर्वं कोलक्षितीशो नयविदुदयव-
र्माभिधः श्रीमदान्धो
लक्ष्मीग्रामद्विजेन्द्रानपि तदधिपतिं
राजराजेश्वरं च ।
प्राज्ञोऽवज्ञाय तावद् विहितसकलस-
त्कर्मलोपोऽनपत्यो
दूनात्मा मन्त्रिवर्यैरपि रविसहजे-
नाथ सम्मन्त्र्य कार्यम् ॥ १ ॥

गत्वा काशीं स गाङ्गे पयसि मलहरे
स्नानकृद् गण्डकायाः
सालग्रामाष्टसाहस्रकमपि परिगृ-
ह्याप्य गोकर्णमत्र ।
कृत्वा नव्यं मयूराभिधनृपतिगिरा
कोटितीर्थं प्रतोष्य
क्रीत्वा कर्णाटविप्रांश्चतुरधिकदशौ-
कःस्थितान् प्राप राज्यम् ॥ २ ॥

सप्तत्रिंशातिरिक्तद्विशतकसकुटु-
म्बद्विजांस्तान् कुशाध-
क्षेत्रे देशेषु पञ्चस्वथ रचितगृ-
हेषु प्रतिष्ठाप्य राजा ।

भाषावेषादि सर्वं भृगुपतिविहितं
त्याजयन् कैरलीकं
कृत्वा वृत्त्यर्थमेषामुचितधनमदात्
स्थानमानादिकं च ॥ ३ ॥
सालग्रामाष्टसाहस्रकमपि रघुना-
थालये स्थापयित्वा
भट्टाध्वर्य्याढ्यसाभाहितिकमुखसम-
ङ्केतकैर्ब्राह्मणैस्तैः ।
नित्यं तत् पूजयित्वा पुनरपि सुबहून्
क्षेत्रवर्यान् विधाय
स्कन्देशादीन् प्रतिष्ठाप्य च विधिवदयं
दत्तवान् ब्राह्मणेभ्यः ॥ ४ ॥
श्रीरामेशार्कदुर्गागुहपवनसुता-
द्यालयाध्यक्षकांस्तान्
सर्वातिथ्या(स्य ? य) विप्रानुदयनृपतिरा-
कल्प्य (हे ? गो)ब्राह्मणा(र्धा ? र्था)न् ।
यज्ञं हैरण्यगर्भं तदुदितविधिना-
धाय भूयोऽप्युपेतान्
तद्बन्धून् स्थापयामास च तदनुमत-
स्तच्चतुर्देशवासान् ॥ ५ ॥
देशेष्वेतान् द्विजातीनिति नवसु समा-
स्थाप्य दत्त्वालयादीन्
भाषावेषादिभिन्नान् पुनरपि सुखमा-
कर्ण्य गोकर्णदेशात् ।

प्राप्तान् कर्णाटविप्रान् स्वयमथ निजरा-
ज्येऽखिले स्थापयित्वा
प्राग्वत् तैरेव विप्रैः कृतसकलविधि-
स्तस्थिवान् कोलभूपः ॥ ६ ॥

विप्राद्ये स्थापितेऽपीश्वरधरणिसु-
रावज्ञयासन्ततिः सन्
वेषे तुल्ये स्वनीते क्षितिसुरवितते:
केरलाचारहान्या ।
खिन्नोऽयं प्राप्य लक्ष्मीपुरमथ विधि-
वन्निष्कृतिं सत्समक्षं
कृत्वा सन्तोष्य विप्रानलभत शिवम-
प्याशिषं सन्ततिं च ॥ ७ ॥

लक्ष्मीग्रामद्विजेन्द्रानयमुदयनृपः
स्मार्तकान् वैदिकांश्च
स्वानीतानां द्विजानामतनुत परिक-
ल्प्यैतदाचारमेषाम् ।
विप्रेन्द्रैस्तैः स्वविप्रैरथ सुकृतनिधिः
स्वार्जयन् सर्वधर्मान्
भुक्त्वा भोगांश्चिरायुः स्वरगमदवनीं
साधु संरक्ष्य सोऽन्ते ॥ ८ ॥

कालेन प्रस्थितास्ते धुतनिजविषयाः
सर्वतः केरलेऽस्मिन्
व्याप्ताः क्षेत्रेषु विप्रादिभिरिह विहिताः
पूजकाः केरलीयैः ।

गोकर्णात् तत्सजात्याः स्वयमिह पुन-
रप्यागतास्तैर्मिलन्त-
स्तत्कन्यामुद्वहन्तो विदधति हि तदा-
चारमद्यापि तेऽन्ये ॥ ९ ॥

श्रीमत्कोलक्षितीशो(न ?)दयनृपचरितं
देशिकानीतिरूपं
तद्वंश्येनात्र केनाप्यभिहितमतिवि-
स्तीर्णमध्याययुग्मम् ।
देवब्रह्मप्रतिष्ठार्थकमिदमुदितं
सम्यगालोच्य केना-
प्युर्वीदेवेन संक्षेपत इह बुधमो-
दाय पद्याष्टकं स्यात् ॥ १० ॥

शुभं भूयात् ।

LIST OF SANSKRIT PUBLICATIONS FOR SALE.

	RS.	AS.	P.
भक्तिमञ्जरी **Bhaktimanjari** (Stuti) by H. H. Svāti Śrī Rāma Varma Mahārāja.	1	0	0
स्यानन्दूरपुरवर्णनप्रबन्धः **Syanandurapuravarnana-prabandha** (Kāvya) by H. H. Svāti Śrī Rāma Varma Mahārāja, with the commentary Sundarī of Rājarāja Varma Koil Tampurān.	2	0	0

Trivandrum Sanskrit Series.

	RS.	AS.	P.
No. 1—दैवम् **Daiva** (Vyākaraṇa) by Deva with Puruṣakāra of Kṛṣṇalīlāśukamuni (*out of stock*).	1	0	0
No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्त्तिस्तवौ **Abhinavakaustubhamala and Daksinamurtistava** by Kṛṣṇalīlāśukamuni (*out of stock*).	0	2	0
No. 3—नलाभ्युदयः **Nalabhyudaya** (Kāvya) by Vāmana Bhaṭṭa Bāṇa (*second edition*).	0	1	0
No. 4—शिवलीलार्णवः **Sivalilarnava** (Kāvya) by Nīlakaṇṭa Dīkṣita (*out of stock*).	2	0	0
No. 5—व्यक्तिविवेकः **Vyaktiviveka** (Alaṅkara) by Mahima-Bhaṭṭa with commentary (*out of stock*).	2	12	0
No. 6—दुर्घटवृत्तिः **Durghatavrtti** (Vyākaraṇa) by Śaraṇadeva (*out of stock*).	2	0	0
No 7—ब्रह्मतत्त्वप्रकाशिका **Brahmatattvaprakasika** (Vedānta) by Sadāśivendrasarasvatī (*out of stock*).	2	4	0
No. 8—प्रद्युम्नाभ्युदयम् **Pradyumnabhyudaya** (Nāṭaka) by Ravi Varma Bhūpa (*out of stock*).	1	0	0

		RS.	AS.	P.
No. 9—विरूपाक्षपञ्चाशिका **Virupaksapancasika** (Vedānta) by Virūpākṣanātha with the commentary of Vidyācakravartin (*out of stock*).		0	8	0
No. 10—मातङ्गलीला **Matangalila** (Gajalakṣaṇa) by Nīlakaṇṭha (*out of stock*).		0	8	0
No. 11—तपतीसंवरणम् **Tapatisamvarana** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).		2	4	0
No. 12—परमार्थसारम् **Paramarthasara** (Vedānta) by Ādiśeṣa with the commentary of Rāghavānanda (*out of stock*).		0	8	0
No. 13—सुभद्राधनञ्जयम् **Subhadradhananjaya** (Nāṭaka) by Kulaśekhara Varma with the commentary of Śivarāma (*out of stock*).		2	0	0
No. 14—नीतिसारः **Nitisara** (Nīti) by Kāmandaka, with the commentary of Śankarārya (*out of stock*).		3	8	0
No. 15—स्वप्नवासवदत्तम् **Svapnavasavadatta** (Nāṭaka) by Bhāsa (*second edition*).		1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् **Pratijnayaugandharayana** (Nāṭaka) by Bhāsa (*out of stock*).		1	8	0
No 17—पञ्चरात्रम् **Pancaratra** (Nāṭaka) by Bhāsa (*out of stock*).		1	0	0
No. 18—नारायणीयम् **Narayaniya** (Stuti) by Nārāyaṇa Bhaṭṭa with the commentary of Deśamangalavārya (*second edition*).		4	0	0
No. 19—मानमेयोदयः **Manameyodaya** (Mīmāmsā) by Nārāyaṇa Bhaṭṭa and Nārāyaṇa Paṇḍita (*out of stock*).		1	4	0
No. 20—अविमारकम् **Avimaraka** (Nāṭaka) by Bhāsa (*out of stock*).		1	8	0
No. 21—बालचरितम् **Balacarita** (Nāṭaka) by Bhāsa (*out of stock*)		1	0	0

	Rs.	As.	P.
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारो-रुभङ्गानि **Madhyamavyayoga-Dutavakya-Dutaghatotkaca-Karnabhara and Urubhanga** (Nāṭaka) by Bhāsa (*out of stock*).	1	8	0
No. 23—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part I, 1st and 2nd Kāṇḍas). (*out of stock*).	1	12	0
No. 24—जानकीपरिणयः **Janakiparinaya** (Kāvya) by Cakra Kavi (*out of stock*).	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका **Kanadasiddhantacandrika** (Nyāya) by Gaṅgādharasūri (*out of stock*).	0	12	0
No. 26—अभिषेकनाटकम् **Abhisekanataka** by Bhāsa (*out of stock*).	0	12	0
No. 27—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part I, 1st and 2nd Sargas) (*out of stock*).	1	12	0
No. 28—वैखानसधर्मप्रश्नः **Vaikhanasadharmaprasna** (Dharmasūtra) by Vikhanas (*out of stock*).	0	8	0
No. 29—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part II, 3rd Kāṇḍa) (*out of stock*).	2	4	0
No. 30—वास्तुविद्या **Vastuvidya** (Śilpa) (*out of stock*).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः **Nanartharnavasamksepa** (Kośa) by Keśavasvāmin (Part III, 4th, 5th and 6th Kāṇḍas).	1	0	0
No. 32—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kālidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part II, 3rd, 4th and 5th Sargas) (*out of stock*).	2	8	0

	RS.	AS.	P.
No. 33—वाररुचसंग्रहः **Vararucasangraha** (Vyākaraṇa) with the commentary Dīpaprabhā of Nārāyaṇa (*out of stock*).	0	8	0
No. 34—मणिदर्पणः **Manidarpana** (Nyāya) by Rājacūḍāmaṇimakhin.	1	4	0
No. 35—मणिसारः **Manisara** (Nyāya) by Gopīnātha.	1	8	0
No. 36—कुमारसम्भवः **Kumarasambhava** (Kāvya) by Kāḷidāsa with the two commentaries, Prakāśikā of Aruṇagirinātha and Vivaraṇa of Nārāyaṇa Paṇḍita (Part III, 6th, 7th and 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् **Asaucastaka** (Smṛti) by Vararuci with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Ṭīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part I, 1st Kāṇḍa).	2	0	0
No. 39—चारुदत्तम् **Carudatta** (Nāṭaka) by Bhāsa (*out of stock*).	0	12	0
No. 40—अलङ्कारसूत्रम् **Alankarasutra** by Rājānaka Ruyyaka with the Alaṅkārasarvasva of Mankhūka and its commentary by Samudrabandha (*second edition*).	2	8	0
No. 41—अध्यात्मपटलम् **Adhyatmapatala** (Vedānta) by Āpastamba with Vivaraṇa of Śrī Śaṅkara-Bhagavat-Pāda (*out of stock*).	0	4	0
No. 42—प्रतिमानाटकम् **Pratimanataka** by Bhāsa (*out of stock*).	1	8	0
No. 43—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Ṭīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part II, 2nd Kanda, 1-6 vargas).	2	8	0
No. 44—तन्त्रशुद्धम् **Tantrasuddha** by Bhaṭṭāraka Vedottama (*out of stock*).	0	4	0

	RS.	AS.	P.
No. 45—प्रपञ्चहृदयम् **Prapancahrdaya.**	1	0	0
No. 46—परिभाषावृत्तिः **Paribhasavrtti** (Vyākaraṇa) by Nīlakaṇṭa Dīkṣita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedānta) by Kṛṣṇānanda Sarasvatī (Part I.)	1	12	0
No. 48—सिद्धान्तसिद्धाञ्जनम् Do. Do. (Part II).	2	0	0
No. 49—गोलदीपिका **Goladipika** (Jyotiṣa) by Parameśvara.	0	4	0
No. 50—रसार्णवसुधाकरः **Rasarnavasudhakara** (Alaṅkâra) by Siṅga Bhūpāla.	3	0	0
No. 51—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the two commentaries, Amarakośodghāṭana of Kṣīrasvāmin and Tīkāsarvasva of Vandyaghaṭīya Sarvānanda (Part III, 2nd Kanda, 7-10 vargas).	2	0	0
No. 52—नामलिङ्गानुशासनम् **Namalinganusasana** (Kośa) by Amarasimha with the commentary Tikâsarvasva of Vandyaghaṭîya Sarvânanda (Part IV, 3rd Kâṇḍa).	1	8	0
No. 53—शाब्दनिर्णयः **Sabdanirnaya** (Vedânta) by Prakâśâtmayatîndra.	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः **Sphotasiddhinyayavicara** (Vyâkaraṇa).	0	4	0
No. 55—मत्तविलासप्रहसनम् **Mattavilasaprahasana** (Nâṭaka) by Mahendravikramavarman. (*out of stock*).	0	8	0
No. 56—मनुष्यालयचन्द्रिका **Manusyalayacandrika** (Śilpa) (*out of stock*).	0	8	0
No. 57—रघुवीरचरितम् **Raghuviracarita** (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatî (Part III).	2	0	0

	RS.	AS.	P.
No. 59—नागानन्दम् **Naganananda** (Nâṭaka) by Harṣadeva with the commentary Vimarśinī of Śivarâma (*out of stock*).	3	4	0
No. 60—लघुस्तुतिः **Laghustuti** by Laghubhaṭṭâraka with the commentary of Râghavânanda.	0	8	0
No. 61—सिद्धान्तसिद्धाञ्जनम् **Siddhantasiddhanjana** (Vedânta) by Kṛṣṇânanda Sarasvatī (Part IV).	1	4	0
No. 62—सर्वमतसंग्रहः **Sarvamatasangraha.** (*out of stock*).	0	8	0
No. 63—किरातार्जुनीयम् **Kiratarjuniya** (Kâvya) by Bhâravi with the commentary Śabdârthadīpika of Citrabhânu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः **Meghasandesa** by Kâlidāsa with the commentary Pradīpa of Dakṣiṇâvartanātha.	0	12	0
No. 65—मयमतम् **Mayamata** (Śilpa) by Mayamuni (*out of stock*).	3	4	0
No. 66—महार्थमञ्जरी **Maharthamanjari** (Darśana) with the commentary Parimala of Maheśvarânanda.	2	4	0
No. 67—तन्त्रसमुच्चयः **Tantrasamuccaya** (Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part I, 1-6 Paṭalās) (*out of stock*).	3	4	0
No. 68—तत्त्वप्रकाशः **Tattvaprakasa** (Āgama) by Śrī Bhojadeva with the commentary Tâtparyadīpikā of Śrī Kumāra	1	12	0
No. 69—ईशानशिवगुरुदेवपद्धतिः **Isanasivagurudevapaddhati** (Tantra) by Īśânaśivagurudevamiśra Part I, Sâmânyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः **Aryamanjusrimulakalpa** (Part I)	2	8	0

	RS.	AS.	P.
No. 71—**तन्त्रसमुच्चयः Tantrasamuccaya**(Tantra) by Nârâyaṇa with the commentary Vimarśinī of Śaṅkara (Part II, 7—12 Paṭalās) (*out of stock*).	3	8	0
No. 72—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part II, Mantrapâda).	4	0	0
No. 73—**ईश्वरप्रतिपत्तिप्रकाशः Isvarapratipattiprakasa** (Vedânta) by Madhusūdanasarasvatī.	0	4	0
No. 74—**याज्ञवल्क्यस्मृतिः Yajnavalkyasmrti** with the commentary Bâlakrîḍâ of Viśvarûpâcârya (Part I — Âcâra and Vyavahâra Adhyâyās).	3	4	0
No. 75—**शिल्परत्नम् Silparatna** (Śilpa) by Śrīkumâra (Part I).	2	12	0
No. 76—**आर्यमञ्जुश्रीमूलकल्पः Aryamanjusrimulakalpa** (Part II).	3	0	0
No. 77—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part III, Kriyāpāda 1—30 Paṭalās).	3	0	0
No. 78—**आश्वलायनगृह्यसूत्रम् Asvalayanagrhyasutra** with the commentary Anâvilā of Haradattâcârya.	2	6	0
No. 79—**अर्थशास्त्रम् Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part I, 1 & 2 Adhikaraṇās).	3	12	0
No. 80—**अर्थशास्त्रम् Do.** Do. (Part II, 3—7 Adhikaraṇās).	4	0	0
No. 81—**याज्ञवल्क्यस्मृतिः Yajnavalkyasmrti** with the commentary Bâlakrīḍa of Viśvarūpācârya (Part II. Prâyaścittâdhyâya).	2	0	0
No. 82—**अर्थशास्त्रम् Arthasastra** of Kauṭalya with commentary by Mahāmahopādhyāya T. Gaṇapati Śāstri (Part III, 3—15 Adhikaraṇās).	3	4	0

	RS.	AS.	P.
No. 83—**ईशानशिवगुरुदेवपद्धतिः Isanasivagurudevapaddhati** (Tantra) by Īśānaśivagurudevamiśra (Part IV, Kriyāpāda 31–64 Paṭalās and Yogapāda).	3	8	0
No 84—**आर्यमञ्जुश्रीमूलकल्पः Aryamanjusrimulakalpa** (Part III).	2	0	0
No 85—**विष्णुसंहिता Visnusamhita** (Tantra).	2	8	0
No. 86—**भरतचरितम् Bharatacarita** (Kâvya) by Kṛṣṇakavi.	1	8	0
No. 87—**सङ्गीतसमयसारः Sangitasamayasara** (Saṅgīta) of Saṅgītâkara Pârśvadeva.	1	2	0
No. 88—**काव्यप्रकाशः Kavyaprakasa** (Alaṅkâra) of Mammaṭabhaṭṭa with the two commentaries the Sampradāyaprakāśinī of Śrī Vidyācakravartin and the Sâhityacûḍâmaṇi of Bhaṭṭagopâla (Part I, 1–5 Ullâsās).	3	0	0
No. 89—**स्फोटसिद्धिः Sphotasiddhi** (Vyākaraṇa) by Bharatamiśra.	0	8	0
No. 90—**मीमांसाश्लोकवार्त्तिकम् Mimamsaslokavartika** with the commentary Kāśikā of Sucaritamiśra (Part I).	2	8	0
No. 91—**होराशास्त्रम् Horasastra** of Varāhamihirācārya with the Vivaraṇa of Rudra.	3	0	0
No. 92—**रसोपनिषत् Rasopanisat.**	2	0	0
No. 93—**वेदान्तपरिभाषा Vedantaparibhasa** (Vedānta) of Dharmarājādhvarīndra with the commentary Prakāśika of Peddādīkṣita.	1	8	0
No. 94—**बृहद्देशी Brihaddesi** (Saṅgīta) of Mataṅgamuni.	1	8	0
No. 95—**रणदीपिका Ranadipika** (Jyotiṣa) of Kumāragaṇaka.	0	4	0

	RS.	AS.	P.
No. 96—ऋक्संहिता **Rksamhita** with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya (Part I, 1st Adhyāya in 1st Aṣṭaka).	1	8	0
No. 97—नारदीयमनुसंहिता **Naradiyamanusamhita** (Smṛti) with Bhāṣya of Bhavasvāmin.	2	0	0
No. 98—शिल्परत्नम् **Silparatna** (Śilpa) by Śrīkumāra. (Part II.)	2	8	0
No. 99—मीमांसाश्लोकवार्त्तिकम् **Mimamsaslokavartika** (Mīmāmsā) with the commentary Kāśikā of Sucaritamiśra (Part II).	2	0	0
No. 100—काव्यप्रकाशः **Kavyaprakasa** (Alaṅkāra) of Mammaṭabhaṭṭa with the two commentaries, Sampradāyaprakāśinī of Śrīvidyācakravartin and Sāhityacūḍāmaṇi of Bhaṭṭagopāla. (Part II, 6–10 Ullāsās).	5	0	0
No. 101—आर्यभटीयम् **Aryabhatiya** (Jyotiṣa) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan (Part I. Gaṇitapāda).	2	8	0
No. 102—दत्तिलम् **Dattila** (Saṅgīta) of Dattilamuni.	0	4	0
No. 103—हंससन्देशः **Hamsasandesa** (Vedānta) with commentary.	0	8	0
No. 104—साम्बपञ्चाशिका **Sambapancasika** (Stuti) with commentary.	1	0	0
No. 105—निधिप्रदीपः **Nidhipradipa** of Siddhaśrikaṇṭhaśambhu.	0	4	0
No. 106—प्रक्रियासर्वस्वम् **Prakriyasarvasva** (Vyākaraṇa) of Śrī Nārāyaṇa Bhatta with commentary (Part I.)	1	0	0

	RS.	AS.	P.
No. 107—**काव्यरत्नम्** **Kavyaratna** (Kāvya) of Arhaddāsa	0	12	0
No. 108—**बालमार्ताण्डविजयम्** **Balamartanda-vijaya** (Nāṭaka) of Devarājakavi.	1	8	0
No. 109—**न्यायसारः** **Nyayasara** with the commentary of Vāsudevasūri.	1	8	0
No. 110—**आर्यभटीयम्** **Aryabhatiya** (Jyotiṣā) of Āryabhaṭācārya with the Bhāṣya of Nīlakaṇṭhasomasutvan.(Part II. Kālakriyāpāda)	1	0	0
No. 111—**हृदयप्रियः** **Hridayapriya** (Vaidyaka) by Parameśvara.	3	0	0
No. 112—**कुचेलोपाख्यानम् अजामिलोपाख्यानं च ।** **Kucelopakhyana and Ajamilopakhyana** (Saṅgīta) by H. H. Svāti Śrī Rāma Varma Mahārāja.	0	4	0
No. 113—**सङ्गीतकृतयः** **Sangitakrtis** (Gāna) of H. H. Svāti Śrī Rāma Varma Mahārāja	1	0	0
No. 114—**साहित्यमीमांसा** **Sahityamimamsa** (Alaṅkāra)	1	0	0
No. 115—**ऋक्संहिता** **Rksamhita** (with the Bhāṣya of Skandasvāmin and the commentary of Veṅkaṭamādhavārya) (Part II 2nd Adhyāya in Ist Aṣṭaka.)	1	8	0
No. 116—**वाक्यपदीयम्** **Vakyapadiya** (Vyākaraṇa) with the commentary Prakīrṇakaprakāśa by Helarāja son of Bhūtirāja. (Part I).	1	8	0

	RS.	AS.	P.
No. 117—सरस्वतीकण्ठाभरणम् **Sarasvatikanta-bharana** (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha. (Part I).	1	8	0
No. 118—बालरामभरतम् **Balaramabharata** (Nāṭya) by Bālarāma Varma Vanci Māhāraja.	2	8	0
No. 119—विवेकमार्तण्डः **Vivekamarthanda** (Vedānta) of Viśvarūpadeva	0	8	0
No. 120—शौनकीयम् **Saunakiya.** (Smṛti)	0	8	0
No 121—वैखानसागमः **Vaikhanasagama** (Tantra) of Marīci.	2	0	0
No. 122—प्रबोधचन्द्रोदयम् **Prabodhacandrodaya** (Nāṭaka) by Kṛṣṇamiśrayati with the commentary Nāṭakābharaṇa of Śrī Govindāmṛtabhagavān.	2	0	0
No. 123—सङ्ग्रामविजयोदयः **Sangramavijayodaya**(Jyotiṣa).	2	0	0
No. 124—हरमेखला **Haramekhala** (Vaidyaka) of Māhuka with commentary (Part I. chapters 2, 3 & 4)	1	8	0
No. 125—कोकसन्देशः **Kokasandesa** (Kāvya) by Viṣṇutrātā.	0	8	0
No. 126—करणपद्धतिः **Karanapaddhati** (Jyotiṣa).	0	4	0
No. 127—सरस्वतीकण्ठाभरणम् **Sarasvatikanta-bharana** (Vyākaraṇa) by Bhojadeva with the commentary of Śrī Nārāyaṇa Daṇḍanātha. Part II)	1	8	0
No. 128—भृङ्गसन्देशः **Bhringasandesa** (Kāvya) by Vāsudeva.	0	6	0
No. 129—हंससन्देशः **Hamsasandesa** (Kāvya)	0	4	0

	RS.	AS.	P.
No. 130—**महानयप्रकाशः Mahanayaprakasa** (Vedānta) by Abhinavaguptācārya.	0	8	0
No. 131—**वृत्तवार्त्तिकम् Vrttavartika** (Chandas) by Rāmapāṇivāda.	1	8	0
No. 132—**तन्त्रोपाख्यानम् Tantropakhyana** (Kāvya)	0	6	0
No. 133—**उदयवर्मचरितम् Udayavarmacarita.**	1	0	0

Apply to:—

The Superintendent,

Government Press,

Trivandrum.